7

# सङ्ख्या



**सुरेशः** : अहो रमेश ! कुत्र गच्छति ?

**रमेशः** : आपणं गच्छामि ।

**सुरेशः** : अहम् अपि आगच्छामि ।

**रमेशः** : भवान् किं क्रेतुम् इच्छति ।

**सुरेशः** : अहं फलानि क्रेतुम् इच्छामि ।

**रमेशः** : पश्यत, तत्रैव फलविपणीम् अस्ति । चलतु ।

| | | |
|---|---|---|
| **सुरेशः** | : | पञ्चम्यां विपण्यां पक्वानि फलानि सन्ति । |
| **रमेशः** | : | भद्र, आम्रफलानां कियत् मूल्यम् ? |
| **फलविक्रेता** | : | पञ्चाशत्रूप्यकाणां दश फलानि । |
| **रमेशः** | : | द्वादशकदलीफलानाम् ? |
| **फलविक्रेता** | : | षोडशरुप्यकाणि । |
| **रमेशः** | : | चतुर्णां नारङ्गफलानाम् ? |
| **फलविक्रेता** | : | विंशतिरूप्यकाणि । |
| **सुरेशः** | : | तर्हि मह्यं त्रिंशत् कदलीफलानि ददातु । |
| **रमेशः** | : | मह्यं द्वादश नारङ्गफलानि ददातु । |
| **सुरेशः** | : | कियत् मूल्यम् ? |
| **फलविक्रेता** | : | कदलीफलानां चत्वारिंशत् ,नारङ्गफलानां च षष्टिः । |
| **रमेशः** | : | शतरूप्यकाणि स्वीकरोतु । |
| **फलविक्रेता** | : | भवतु । |

## टिप्पणी

**कदलीफलम्** કેળું **नारङ्गफलम्** નારંગી **आम्रफलम्** કેરી **आपणम्** દુકાન **क्रेतुम्** ખરીદવા માટે **विपणी** દુકાન **पक्वानि** પાકેલાં **भद्र** મહાશય **कियत्** કેટલું **भवतु** ભલે.

## स्वाध्यायः

**1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :**

आपणम्, क्रेतुम्, तत्रैव, विपण्याम्, पञ्चाशत्, रूप्यकाणाम्, चतुर्णाम्, नारङ्गफलानाम्, मह्यम्, शतरूप्यकाणि

2. આપેલા પ્રશ્નોના જવાબ સંસ્કૃત ભાષામાં લખો :

(1) द्वादश कदलीफलानां कियत् मूल्यम् ?

(2) कति नारङ्गफलानां मूल्यं विंशतिः रूप्यकाणि ?

(3) कः फलविक्रेत्रे शतरूप्यकाणि ददाति ?

(4) रमेशः कति नारङ्गफलानि क्रीणाति ?

(5) त्रिंशत् कदलीफलानां कियत् मूल्यम् ?

3. જોડકાં જોડો :

| | अ | ब |
|---|---|---|
| (1) | नवनवतिः | ९६ |
| (2) | षट्सप्ततिः | ४९ |
| (3) | नवचत्वारिंशत् | ९९ |
| (4) | एकाशीतिः | ७६ |
| (5) | षण्णवतिः | ८१ |

(ક) ખાલી જગ્યા પૂરો :

(1) ______________ कदलीफलानां चतुस्त्रिंशत् रुप्यकाणि ।

(2) पञ्च दाडिमानां मूल्यं ______________ रूप्यकाणि ।

(3) दश आम्रफलानां मूल्यं ______________ रूप्यकाणि ।

(ખ) પ્રશ્ન 4માં આપેલ કોષ્ટકના આધારે આપેલાં વાક્યો ખરાં છે કે ખોટાં તે કહો :

(1) दश सेवफलानां मूल्यं अष्टनवति रूप्यकाणि । ( )

(2) उपनेत्रस्य मूल्यं पञ्चाशद् रूप्यकाणि । ( )

(3) युतकस्य मूल्यं पञ्चषष्टिः रूप्यकाणि । ( )

4. કોષ્ટકના આધારે તેની નીચે આપેલા પ્રશ્નોના જવાબ લખો :

| फलानि | मूल्यम् | वस्तूनि | मूल्यम् |
|---|---|---|---|
| द्वादश कदलीफलानि | ३५ | उपनेत्रम् | ७५ |
| पञ्च दाडिमफलानि | ४० | कर्तरी | ४६ |
| दश सेवफलानि | ९८ | तालम् | ६० |
| द्राक्षाफलानि | ४६ | घटः | ८० |
| चतुर्विंशतिः आम्रफलानि | १०० | युतकम् | ६५ |

**પ્રશ્નો :**

(1) कस्य मूल्यं पञ्चसप्तति रूप्यकाणि अस्ति ?

(2) पञ्च दाडिमस्य मूल्यं कति रूप्यकाणि अस्ति ?

(3) तालस्य मूल्यं कति रूप्यकाणि अस्ति ?

(4) षट्चत्वारिंशत् रूप्यकाणि कस्य कस्य मूल्यं अस्ति ?

5. શબ્દોમાં અને અંકમાં લખો :

(1) 68 : ____________

(2) 74 : ____________

(3) 100 : ____________

(4) 88 : ____________

(5) 57 : ____________

6. **કોષ્ટક પૂરું કરો :**

| | | | |
|---|---|---|---|
| | द्विषष्टिः | ८२ | |
| ८७ | | | त्रिपञ्चाशत् |
| | द्विनवतिः | ८३ | |
| ५६ | | | पञ्चचत्वारिंशत् |
| | सप्तत्रिंशत् | ८८ | |

## **પ્રવૃત્તિ**

(1) **૧થી ૧૦૦ સુધીની સંખ્યાનાં અંકકાર્ડ તથા શબ્દકાર્ડ બનાવો.**

(2) कति **અને** कियत् **શબ્દોનો ઉપયોગ કરી પાંચ પ્રશ્નો બનાવો.**

**ઉદાહરણ :** (1) पाण्डवाः कति सन्ति ? (2) घटे कियत् जलम् अस्ति ?

किं भवान् जानाति ?

भारतदेशे द्वादश ज्योतिर्लिङ्गानि सन्ति ।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १. | एकम् | २१. | एकविंशति: | ४१. | एकचत्वारिंशत् | ६१. | एकषष्टि: | ८१. | एकाशीति: |
| २. | द्वे | २२. | द्वाविंशति: | ४२. | द्विचत्वारिंशत् | ६२. | द्विषष्टि: | ८२. | द्वाशीति: |
| ३. | त्रीणि | २३. | त्रयोविंशति: | ४३. | त्रिचत्वारिंशत् | ६३. | त्रिषष्टि: | ८३. | त्र्यशीति: |
| ४. | चत्वारि | २४. | चतुर्विंशति: | ४४. | चतुश्चत्वारिंशत् | ६४. | चतु:षष्टि: | ८४. | चतुरशीति: |
| ५. | पञ्च | २५. | पञ्चविंशति: | ४५. | पञ्चचत्वारिंशत् | ६५. | पञ्चषष्टि: | ८५. | पञ्चाशीति: |
| ६. | षट् | २६. | षड्विंशति: | ४६. | षट्चत्वारिंशत् | ६६. | षट्षष्टि: | ८६. | षडशीति: |
| ७. | सप्त | २७. | सप्तविंशति: | ४७. | सप्तचत्वारिंशत् | ६७. | सप्तषष्टि: | ८७. | सप्ताशीति: |
| ८. | अष्ट | २८. | अष्टाविंशति: | ४८. | अष्टचत्वारिंशत् | ६८. | अष्टषष्टि: | ८८. | अष्टाशीति: |
| ९. | नव | २९. | नवविंशति: | ४९. | नवचत्वारिंशत् | ६९. | नवषष्टि: | ८९. | नवाशीति: |
| १०. | दश | ३०. | त्रिंशत् | ५०. | पञ्चाशत् | ७०. | सप्तति: | ९०. | नवति: |
| ११. | एकादश | ३१. | एकत्रिंशत् | ५१. | एकपञ्चाशत् | ७१. | एकसप्तति: | ९१. | एकनवति: |
| १२. | द्वादश | ३२. | द्वात्रिंशत् | ५२. | द्विपञ्चाशत् | ७२. | द्विसप्तति: | ९२. | द्विनवति: |
| १३. | त्रयोदश | ३३. | त्रयस्त्रिंशत् | ५३. | त्रिपञ्चाशत् | ७३. | त्रिसप्तति: | ९३. | त्रिनवति: |
| १४. | चतुर्दश | ३४. | चतुस्त्रिंशत् | ५४. | चतुष्पञ्चाशत् | ७४. | चतुस्सप्तति: | ९४. | चतुर्णवति: |
| १५. | पञ्चदश | ३५. | पञ्चत्रिंशत् | ५५. | पञ्चपञ्चाशत् | ७५. | पञ्चसप्तति: | ९५. | पञ्चनवति: |
| १६. | षोडश | ३६. | षट्त्रिंशत् | ५६. | षट्पञ्चाशत् | ७६. | षट्सप्तति: | ९६. | षण्णवति: |
| १७. | सप्तदश | ३७. | सप्तत्रिंशत् | ५७. | सप्तपञ्चाशत् | ७७. | सप्तसप्तति: | ९७. | सप्तनवति: |
| १८. | अष्टादश | ३८. | अष्टात्रिंशत् | ५८. | अष्टपञ्चाशत् | ७८. | अष्टसप्तति: | ९८. | अष्टनवति: |
| १९. | नवदश | ३९. | नवत्रिंशत् | ५९. | नवपञ्चाशत् | ७९. | नवसप्तति: | ९९. | नवनवति: |
| २०. | विंशति: | ४०. | चत्वारिंशत् | ६०. | षष्टि: | ८०. | अशीति: | १००. | शतम् |

**"हसाम:"**

"अद्य पाठ: अस्ति इत्यस्य भविष्यत्कालरूपं किम् ?"

"श्व: विराम: भविष्यति इति ।"

"कथम् एतत् ?"

"यत: श्व: रविवासर:"